# अभ्यासप्रश्नपत्रम् 2021-22

## द्वितीयं सत्रम्

### कक्षा- नवमी

### संस्कृतम्

**समयः होराद्वयम्** **सम्पूर्णाङ्काः- 40**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षण् कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 7 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | | | |
|---|---|---|---|
| | **अपठितावबोधनम्** | | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>अस्माकं भारतवर्षः बहुकालपर्यन्तं पराधीनतायाः श्रृङ्खलासु बद्धः आसीत्। भारतवर्षं स्वाधीनं कुर्वाणम् अनेके वीराः स्वात्मानं हुतवन्तः। भारतस्य स्वाधीनतायाः आन्दोलने सर्वे आबालवृद्धाः सक्रियाः आसन्। अस्मिन् अनेकानां नामानि वयं जानीमः अनेकानाञ्च नामानि वयं न जानीमः। मातृभूम्याः स्वाधीनतायाः कृते तेषां समेषां वीराणां बलिदानं वयं सर्वदा स्मरिष्यामः।<br><br>**(अ) एकपदेन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. अस्माकं भारतवर्षः बहुकालपर्यन्तं कस्याः श्रृङ्खलासु बद्धः आसीत्।?<br>ii. भारतवर्षं स्वाधीनं कुर्वाणम् के स्वात्मानं हुतवन्तः?<br>iii. केषां नामानि वयं जानीमः?<br><br>**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br>i. भारतस्य स्वाधीनतायाः आन्दोलने के सक्रियाः आसन्?<br>ii. मातृभूम्याः स्वाधीनतायाः कृते केषां बलिदानं वयं सर्वदा स्मरिष्यामः?<br>iii. अस्माकं भारतवर्षः बहुकालपर्यन्तं कासु बद्धः आसीत्?<br><br>**(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत–**<br><br>**(ई) यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्)**<br>i. 'विघ्नः' पदस्य किं समानार्थकं पदं गद्यांशे प्रयुक्तम्?<br>ii. 'हुतवन्तः' क्रियायाः कर्तृपदं गद्यांशात् चित्वा लिखत।<br>iii. 'निष्क्रियाः' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।<br>iv. 'समेषां वीराणाम्' इत्यनयोः पदयोः विशेषणपदं किम्? | 10<br><br>**1x2=2**<br><br>**2x2=4**<br><br>**1**<br><br>**1x3=3** | |
| | | | |
| | **रचनात्मकं कार्यम्** 15 अङ्काः | | |

| | | |
|---|---|---|
| 2. | अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत- | ½X10=5 |

**भवान् दीपकः। भवतः विद्यालये कोरोनाटीकाकरणशिविरस्य आयोजनम् अभवत्, इति सूचयन् पितरं प्रति पत्रं लिखतु।**

देहलीतः

दिनांकः ..............

पूजनीयाः पितृचरणाः!

सादरं ......(i)..........

अत्र कुशलं .........(ii)......। अद्याहं भवन्तं प्रार्थयामि यद् अस्माकं विद्यालये गतमासे .........(iii)........ आयोजनम् अभवत्। एतद् शिविरं पञ्चदश आयुवर्गात् आरभ्य अष्टादश आयुवर्गाणां .........(iv)....... कृते आसीत्। अस्माकं प्राध्यापिका श्रीमती रीता शर्मा शिविरस्य प्रमुखा......(v)............ आसीत्। सा अस्मान् टीकाकरणस्य ......(vi)...... बोधितवती। तदनन्तरम् द्वादशकक्षायाः पञ्च ......(vii)....... एतस्मिन् शुभकार्ये अग्रे आगताः। तेषाम् उत्साहं ......(viii)......... मम मनसि अपि भावना जागृता तथा च मयाऽपि टीकास्वीकरणाय निश्चयं कृतम्। आशासे यद् भवान् मम एतादृशीं भावनां दृष्ट्वा प्रसन्नो भविष्यति। अहम् इदानीं पूर्णतया सकुशलोऽस्मि। पितामहयोः चरणयोः मम प्रणामाः ......(ix).........।

भवतः आज्ञाकारी पुत्रः,

......(x)...........

**मञ्जूषा**

| |
|---|
| बालकानां, दीपकः, कोरोनाटीकाकरणशिविरस्य, तत्रास्तु, महत्त्वं, प्रणमामि, संयोजिका, छात्राः, निवेदनीयाः, दृष्ट्वा |

| | | |
|---|---|---|
| 3. | प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत। | 1x5=5 |



**मञ्जूषा**

पश्यति, भवनम्, उत्पतन्ति, सरोवरे, उद्यानम्, वृक्षाः, नभसि, मत्स्याः, सन्ति, पुरतः, जनः, दूरवाणीं, सुखदा, निर्मला वायुः, रम्यं, दृश्यम्, विहगाः।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**काकः**

काकः पक्षिषु चतुरः कृष्णवर्णः, अन्नं, मांसं च, शिशोः हस्तात्, रोटिका, आच्छिद्य उड्डीयते, भक्षयति, पिबति, आनयति, रवः, कटुः पिकः, परिश्रमी, प्रस्तरान्, जलं, घटः।

| | | |
|---|---|---|
| 4. | अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं पञ्चवाक्यम्) | 1x5=5 |

i. वह मेरा घर है।
That is my home.

ii. यह रितेश की पुस्तक है।
This is Ritesh's book.

| | | |
|---|---|---|
| | iii. सीमा गाना गाती है।<br>Seema sings a song.<br>iv. मैंने पुस्तक पढी।<br>I read a book.<br>v. बीना कल घर जायेगी।<br>Beena will go home tomorrow.<br>vi. संस्कृत सभी भाषाओं की जननी है<br>Sanskrit is mother of all languages. | |
| | **पठितावबोधनम्** | **15** |
| **5.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**<br><br>प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः सुखसाधनैः च तर्पयति। पृथिवी, जलं, तेजः, वायुः, आकाशः, च अस्याः प्रमुखानि तत्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। यथा अजातश्शिशुः मातृगर्भे सुरक्षितः तिष्ठति तथैव मानवः पर्यावरणकुक्षौ। परिष्कृतं प्रदूषणरहितं च पर्यावरणम् अस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च प्रददाति।<br><br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. समेषां प्राणिनां संरक्षणाय कः यतते?<br>ii. अजातश्शिशुः कुत्र सुरक्षितः तिष्ठति?<br>iii. पर्यावरणकुक्षौ कः सुरक्षितः तिष्ठति?<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. प्रकृतेः कानि प्रमुखानि तत्वानि?<br>ii. परिष्कृतं प्रदूषणरहितं च पर्यावरणम् अस्मभ्यं कीदृशीं सामग्रीं प्रददाति?<br>iii. अनुच्छेदे पर्यावरणशब्दस्य का व्युत्पत्तिः प्रदर्शिता? | **3**<br><br>**½ x2=1**<br><br>**1x2=2** |
| | | |
| **6.** | **अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br><br>**तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।**<br>**निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः॥** | **3** |

| | | |
|---|---|---|
| | (अ) **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. अवसुप्तः सन् कः शब्दं शुश्रुवे?<br>ii. जटायुः क्षिप्रं कं निरीक्षितः?<br>iii. रावणं निरीक्ष्य जटायुः कां ददर्श?<br>(आ) **पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. जटायुः तं शब्दं कथं शुश्रुवे?<br>ii. कः रावणं क्षिप्रं निरीक्षितवान्?<br>iii. जटायुः कां ददर्श? | **½ x2=1**<br><br>**1x2=2** |
| **7.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तराणि संस्कृतेन लिखत–**<br>हन्त! नास्त्यभावो जगति मूर्खाणाम्। तीव्रप्रवाहायां नद्यां मूढोऽयं सिकताभिः सेतुं निर्मातुं प्रयतते।<br>**तपोदत्तः–** (साट्टहासं पार्श्वमुपेत्य) भो महाशय! किमिदं विधीयते? अलमलं तव श्रमेण। पश्य–<br>रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।<br>विदधद् बालुकाभिस्तं यासि त्वमतिरामताम्॥<br>चिन्तय तावत्, सिकताभिः क्वचित्सेतुः कर्तुं युज्यते?<br>**पुरुषः –** भोस्तपस्विन् कथं माम अवरोधं करोषि? प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया॥<br>(अ) **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. जगति केषाम् अभावः नास्ति?<br>ii. तीव्रप्रवाहायां नद्यां कः सिकताभिः सेतुं निर्मातुं प्रयतते?<br>iii. सेतुनिर्माणे केषाम् आवश्यकता नास्ति?<br>(आ) **पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. तपोदत्तः साट्टहासं महाशयं किम् अवदत्?<br>ii. मकरालये कः शिलाभि सेतुं बबन्ध?<br>iii. कया युक्तः पुरुषः सिकताभिः सेतुं करिष्यति? | **3**<br><br>**½ x2=1**<br><br>**1x2=2** |
| **8.** | **मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखित–श्लोकस्य अन्वयं पूरयत–**<br>**विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।**<br>**यदि विद्या वशे स्युस्ते सेतुरेष तथा मम॥**<br>**अन्वयः –** यदि लिप्यक्षरज्ञानं ……(i)…… केवलम् ………(ii)……. एव विद्या ते ……(iii)……….स्युः। तथा एव एषः मम ……(iv)….  ॥<br>मञ्जूषा | **½ x4=2** |

| | | |
|---|---|---|
| | तपोभिः, विना, वशे, सेतुः<br><br>**अथवा**<br><br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–**<br><br>**वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।**<br>**न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि॥**<br><br>**भावार्थः–** अस्य भावोऽस्ति यत् अहं जटायुः ……(i)……. त्वं ……(ii)…… धन्वी सरथः कवची शरी अस्ति। अपि च एतदनन्तरं त्वं मे ……(iii)……… आदाय ……(iv) ……. न गमिष्यसि॥<br><br>मञ्जूषा<br><br>वैदेहीं, वृद्धः, कुशली, युवा | |
| | | |
| 9. | **अधोलिखित- कथांशं यथाक्रमं लिखतु।**<br><br>i. ततो भूयोभूयः हठमाचरति बाले सः मधुकरः अगायत्।<br>ii. श्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्।<br>iii. तदा सः बालः अलं भाषणेन अनेन मिथ्यागर्वितेन कीटेन इति विचिन्त्य अन्यत्र गतः।<br>iv. तन्द्रालुः बालः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानं प्राविशत्।<br>v. तथापि, सः मधुकरः अस्य बालस्य आह्वानं तिरस्कृतवान्।<br>vi. अथ सः पुष्पोद्यानं व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडितुं द्वित्रिवारं आह्वयत्।<br>vii. तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्।<br>viii. वयं हि मधुसंग्रहव्यग्रा इति। | **½ x8=4** |